# मीमांसाशास्त्रपरिचयः

श्रीमन्तभद्रः

पुराणन्यायमीमांसा धर्मशास्त्राङ्गमिश्रिताः।
वेदाः स्थानानि विद्यानां धर्मस्य च चतुर्दश॥ (याज्ञवल्क्यस्मृतिः- १.३)

इति स्मरणेन चतुर्दशसु विद्यास्थानेषु मीमांसा अन्यतमा इति विज्ञायते। तस्य मीमांसाशब्दस्य व्युत्पत्तिरित्थमस्ति– मान् पूजायामिति धातोः 'मानेर्जिज्ञासायाम्' इति वार्तिकेन सनि प्रत्यये द्वित्त्वे इत्त्वे 'मान्वधदान्शान्भ्यो दीर्घश्चाभ्यासस्य' (अष्टाध्यायी ३.१.६) इति सूत्रेण अभ्यासस्य दीर्घे 'अ प्रत्ययात्' (अष्टाध्यायी ३.३.१०२) इति सूत्रेण अप्रत्यये 'अजाद्यतष्टाप्' (अष्टाध्यायी ४.१.४) इति सूत्रेण टापि प्रक्रियया 'मीमांसा' इति शब्दो निष्पद्यते। अस्य मीमांसाशब्दस्य संज्ञारूपेण क्रियारूपेण च वेदे प्रयोगो बहुशो दरीदृश्यते– 'सैषा आनन्दस्य मीमांसा भवति' (तैत्तिरीयोपनिषद् १.८.१), 'उत्सृज्याँ नोत्सृज्यामिति मीमांसन्ते ब्रह्मवादिन इत्याहुः उत्सृज्यामेवेति' (तैत्तिरीयसंहिता ७.५.७.१), 'ब्राह्मणं पात्रे न मीमांसेत' (ताण्ड्यमहाब्राह्मणम् ६.५.९) इति। एतासां श्रुतीनां पर्यालोचनेन मीमांसापदस्य विचारपरकत्वं बुध्यते। ततश्च पूजार्थकात् मान्धातोः निष्पन्नत्वात् पूजितविचारो मीमांसापदार्थ इति लभ्यते। तद्भणितं भामत्यां वाचस्पतिमिश्रेण– 'पूजितविचारवचनो हि मीमांसाशब्दः'[1] इति। विचारपूर्वकतत्त्वनिर्णयो मीमांसाशब्दार्थः इति न्यायकोशः। तादर्थ्यात् तच्छब्दप्रयोगः इति रीत्या मीमांसाशब्दः तत्प्रतिपादके मीमांसाशास्त्रेऽपि वर्तते। यद्यपि पुरा मीमांसापदेन कर्मकाण्डज्ञानकाण्डयोः उभयोर्ग्रहणं भवति स्म, परन्तु गच्छता कालेन मीमांसापदेन कर्मकाण्डात्मिकायाः पूर्वमीमांसाया एव ग्रहणं भवति न तु ज्ञानकाण्डात्मिकाया उत्तरमीमांसाया इति बोध्यम्। 'स्वाध्यायोऽध्येतव्यः', 'यजेत स्वर्गकामः', 'न कलञ्जं भक्षयेत्', 'नेक्षेतोद्यन्तमादित्यम्' इति अपूर्वविधानप्रतिषेधाभ्यां शासनाद् मीमांसा शास्त्रपदवीं लभते। जीवस्वरूपभोगापवर्गानां शासनात् मीमांसा शास्त्रपदवीम् अर्थात् दर्शनपदवीमारोहति। मीमांसा व्याकरणेन प्रतिपादितं प्रकृतिप्रत्ययविभागं समाश्रित्य वाक्यार्थं विचारयति। अतो मीमांसाशास्त्रं वाक्यशास्त्रमित्यपि उद्यते। अखिलकर्मकाण्डीयश्रुत्यर्थस्य तात्पर्यनिर्णायकं फलप्रद-देवताप्रतीकोपासनावेदकं वेदव्यासकृपाप्राप्तदिव्यदृष्टिमता मीमांसकप्रमुखेन जैमिनिनानुशिष्टमिदं मीमांसाशास्त्रम्। तस्य सिद्धान्तपोषकाणां प्रेक्षावच्चेतस्सन्तोषकाणां मीमांसकप्रवराणां जैमिनिमुखानामाचार्याणां परिचयः क्रमेण प्रदास्यते।

अनुवर्तिष्यते…

[1] भामती, पृष्ठम् ४६